Digitized by Madhuban Trust, Delhi

RSUP Series No:185

वैखानसागमकोशः
VAIKHĀNASA ĀGAMA KOŚA
Volume X



RASHTRIYA SANSKRIT UNIVERSITY
TIRUPATI
2009

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

RSUP 185

वैखानसागमकोशः

VAIKHĀNASA ĀGAMA KOŚA

Volume X

ri Vipin Kumar Col. Deoband. In Public

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैखानसागमकोशः

दशमं सम्पुटम्

९. प्रायश्चित्तप्रकरणम्

प्रथमो भागः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - १८५

वैखानसागमकोशः

दशमं सम्पुटम्

९.प्रायश्चित्तप्रकरणम्

प्रथमो भागः

प्रधानसम्पादकः

आचार्यः हरेकृष्ण शतपथी

कुलपतिः

सम्पादकौ

आचार्यः लक्ष्मीनरसिंहभट्टः

आचार्यः हयवदनपुराणिकः

विषयविशेषाणां आङ्ग्लसारः

आचार्यः प्रभाकर आपटे

तमसो मा ज्योतिर्गमय

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

(मानितविश्वविद्यालयः)

राष्ट्रियसंस्कृतविश्वविद्यालयः

तिरुपतिः

२००९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला -१८५

वैखानसागमकोशः - दशमं सम्पुटम्

९. प्रायश्चित्तप्रकरणम्

प्रथमसंस्करणम् : २००९

प्रतिकृतयः : १०००

© सर्वाधिकारः राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

प्रधानसम्पादकः प्रकाशकश्च

आचार्यः हरेकृष्णशतपथी

कुलपतिः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः, भारतम्

पुस्तकप्राप्तिसङ्केतः

कुलसचिवः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७ ०६४

आन्ध्रप्रदेशः, भारतम्, दूरवाणी - ०८७७ - २२७८०९

ई-मेल : registrar_rsvp@yahoo.co.in

वेब्साइट : www.rsvidyapeetha.ac.in

मुद्रणाय सज्जीकृतः

आगमकोशपरियोजना

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

मूल्यम् : रू. 290/-

मुद्रकः स्टूडेण्ट्स अफ्सेट, तिरुपतिः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

RASHTRIYA SANSKRIT UNIVERSITY PUBLICATION SERIES -185

VAIKHĀNASA ĀGAMA KOŚA

Volume X

9. Prāyaśchitta Prakaraṇam

PART - I

Chief Editor

PROF. HAREKRISHNA SATAPATHY
Vice-Chancellor

Editors

PROF. LAKSHMINARASIMHA BHATTA

PROF. K. HAYAVADANA PURANIK

Topical Summary

PROF. P. PRABHA KARA APTE

RASHTRIYA SANSKRIT UNIVERSITY

TIRUPATI

2009

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Rashtriya Sanskrit University Publication Series - 185

VAIKHĀNASA ĀGAMA KOŚA - Volume X

9. Prāyaśchitta Prakaraṇam

First edition : 2009

No of copies : 1000

© all rights reserved by R.S.University, Tirupati, A.P.

Chief - Editor & Publisher

Prof. Harekrishna Satapathy
Vice-Chancellor
Rashtriya Sanskrit University, Tirupati, Andhra Pradesh, India.

Book available at

Registrar
Rashritya Sanskrit University
Tirupati - 517 064, Andhra Pradesh, INDIA
Phone : 0877-228709
E-mail : registrar_rsvp@yahoo.co.in
Website : www.rsvidyapeetha.ac.in

Prepared by **Agama Kosa Project**
Rashtriya Sanskrit University, Tiupati.

Price : Rs. 290/-

Printed at : Students Offset, Tirupati

Data Correction & DTP - N.Venkata Ramana Prasad.
The book has been set-in pages in Computer Unit, Agama Kosa Project.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Grams: Vidyapeetha

Prof. Harekrishna Satapathy
Vice-Chancellor

Rashtriya Sanskrit University
(University established under sec.3 of UGC Act, 1956)
Tirupati- 517 064 (A.P.)
(Accredited with A+ Grade by NAAC)

Tel/Fax: 0877 - 2287680
(O) 2287838
(R) 2287826
E-mail : hks_vc@yahoo.com

" Centre of Excellence in the Subject of Traditional Sastras"

FOREWORD

It gives me immense pleasure to write a few lines in way of foreword to the volume X of *Vaikhanasa Agama Kosa* containing the *Prayaschitta Prakaranam* (Part-I). This volume, like others, is also a visible outcome of the tireless offorts and intellectual exercises of the scholars working in *Agama Kosa* project of our University. The Rashtriya Sanskrit University has been able to produce and present nine volumes of *Agama Kosa (Vaikahanasa)* before the world of scholars and researchers. Before producing each volume, the entire gamut of literature pertaining to Agama Scriptures is ransacked, reviewed and revisited by the researchers working in the project and the cream portions of the vast Agama literature are being projected in the form of encyclopaedia in a systematic and disciplined manner. This is the reason why all the volumes of *Vaikhanasa Agama Kosa*, published so far have earned the appreciation of the learners, researchers and scholars of the country and abroad. In order to make the book more accessible to a wider range of scholars, an exhaustive summary of the concerned volume is given in Sanskrit & English in the beginning and this is, no doubt, a useful addition to the book.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

The present volume of the *Vaikhanasa Agama Kosa* deals with the *Prayaschitta Prakaranam.* The theme of the volume has been divided into five areas i.e. i) Atonement for defects in temple construction ii) Atonement for defects in Image-making iii)Atonement for installation defects iv) Expiation for defects in Routine-worship and v) Atonement for flaws in Ablution. All these things have been described elaborately in the present volume. The editors, while preparing this reliable document, have referred to so many scriptures and research papers available in the concerned field. All the relevant portions and quotations have been carefully chosen and incorporated in the book to make it more dependable.

In our tradition, *Prayaschittam* or atonement, plays a vital role particularly in respect of bringing reforms to one's commission and omission of various acts. To err is human and in the process of doing some work, committing some major or minor mistakes, sometimes knowingly or unknowingly, is inevitable. Our ancient sages and seers, with an intention to make work more perfect, pure and scientific, have prescribed some actionable procedures to overcome the defects or lapses. Moreover, some times there occur incidences like earthquakes etc., which are beyond human control for which expiations are prescribed. In addition, some special rituals are prescribed for benevolent results also. This procedure is called '*Prayaschittam*' or atonement. While constructing the temples, carving the images or installing them on a raised platform or performing the daily rituals or offering *Naivedyam,* the persons engaged in the respective processes are likely to make some mistakes or come across with some unforeseen circumstances. In that situation, the authors of the *Agama Sastras* have prescribed some specific atonement of removal of specific

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

defects. These procedures are supposed to be followed in the temples with a view to bringing perfection to the rituals. Needless to mention that all these things have been neatly narrated in this volume for which the scholars associated with the process of preparation and publication of this book, deserve appreciation from all quarters. This publication, I am sure, will cater to the needs of the readers and researchers in the same way in which the previous volumes have done. The University, indeed, is feeling proud and honoured to bring out such prestigious and useful publications intended to preserve and promote the cardinal principles of our glorious culture and hoary traditions.

I wish the publication a great success.

27-4-2009 **(H.K. Satapathy)**

Tirupati. Vice-Chancellor

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Rashtriya Sanskrit University ; Tirupati(A.P)

आगमकोशपरियोजना

Āgama Kośa Project

उपोद्धातः

संविदितमेवेदं समवगतसर्वशास्त्राणां सङ्ख्यावतां समेषां यदत्र निसर्गकरुणा-वरुणालयस्य श्रुतिशिरसि विदीप्तस्य च भगवतः श्रीनिवासस्य राजधान्यां तिरुपतौ संस्कृतं संस्कृतिं च प्रतिष्ठापयितुं केन्द्रसर्वकारेण संस्थापितमिदं राष्ट्रियसंस्कृतविद्यापीठमासंस्थापना-न्निगमागमशास्त्रसंरक्षणदीक्षम् अभिनवप्रयोगशीलं संस्कृतमातरं संसेवमानं भारते स्थेयसीं प्रतिष्ठामध्यास्त इति।

अध्यात्मचिन्तनप्रधानेऽस्मिन् भारतवर्षे सकललोकोज्जीवनाय प्रवृत्तानां तन्त्रापराभिधाना-नामागमानां निरन्तरप्रचारः अनादेः कालात्प्रवर्तते । अविच्छिन्नगुरुशिष्यपरम्परया आगतो ग्रन्थसन्दर्भ आगमपदेनाभिधीयते। यद्यप्याचार्यमुखादधीत्य वेदानधिगच्छन्ति शिष्या इति वेदा अप्यागमशब्देन व्यवह्रियन्ते तथापि चिरादस्मत्पूर्वजाः वेदान् निगमशब्देन विग्रहाराधनप्रति-पादकानि तन्त्राण्यागमशब्देन च व्याजहुः।

भारतीयसंस्कृतिनिधेः वेदस्योपबृंहणाय प्रवृत्ताः शिवविष्ण्वादीनामाराध्यदेवानां पारम्यं प्रतिपादयन्तश्चागमाः शैवशाक्तवैष्णवभेदेन त्रेधा भिद्यन्ते। तत्र शैवागमाः कापालकालामुख-पाशुपतशैवभेदेन चतुर्धा भवन्ति। तत्र शैवभेदः पुनः वाम-दक्षिण-सिद्धान्तभेदेन त्रिधा। दक्षिणभेदे अन्तर्भूतानां काश्मीरागमानामुत्तरदेशेष्वेव प्रचुरः प्रचारः, शैवसिद्धान्तागमानां तु दक्षिणदेशेष्वेव प्रचारः। शैवागमाः शिवपारम्यं शिवपूजादिकं च प्राधान्येन प्रतिपादयन्ति। शाक्तागमा दक्षिणाचारवामाचारभेदेन द्विविधा भवन्ति। दक्षिणाचारः प्रायेण वैदिकमार्गानुसारी। वामाचारस्तु वैदिकमार्गपरिभ्रष्ट इति वदन्ति। उभयेऽपीमे शक्तिपारम्यं शक्तिपूजादिकं च विशेषतः प्रतिपादयन्ति। वैष्णवागमाश्च वैखानसपाञ्चरात्रभेदेन द्विविधा भवन्ति। उभयेऽपीमे विष्णुपारम्यं विष्णुपूजादिकं च प्राधान्येन प्रतिपादयन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाञ्चरात्रागमाः पुनर्भगवता नारायणेन स्वयमुपदिष्टाः दिव्याः, मुनिभाषिता आप्तोक्ता अदिव्या इति द्विविधाः।

भगवता विखनसा भृग्वत्रिमरीचिकाश्यपेभ्यश्चतुर्भ्यः उपदिष्टः तैश्च प्रचारं नीतः वैखानसागमः।

शैव-वैष्णवाद्यागमानां विषयप्रधानाः आगमकोशग्रन्थाः समेषामागमतत्त्वावबोध-कुतूहलिनां महते उपकाराय कल्पन्त इति विद्यापीठसंस्थापकनिदेशकानां डा. बि. आर्. शर्ममहोदयानामभिसन्धिमनुरुध्य तदानीन्तनेन तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघेन (Kendriya Sanskrit Vidyapeetha Tirupati Society) विमर्शनिपुणानामन्ताराष्ट्रियख्यातिभृतां विद्यापीठसंघाध्यक्षाणां डा. वि. राघवन् महोदयानामाध्यक्ष्ये संशोधनप्रकाशनसमितिः व्यवास्थाप्यत यस्यां संशोधनप्रकाशनमर्मज्ञाः डा. एस्. एम्. कत्रे, डा. पि. एल्. वैद्य, डा. आर्येन्द्रशर्मा, डा.बि. आर्. शर्मा इत्येवं विश्वविख्याताः विद्वांसः सदस्या आसन्। तेषां मार्गदर्शनमनुरुध्य विद्यापीठस्य अनुसन्धानप्रकाशनविभागस्य विद्वद्भिः क्रिस्तूत्तरचतुः षष्ट्यधिकनवशतोत्तरैकसहस्रतमवत्सरतः क्रिस्तूत्तरषडशीत्यधिकनवशतोत्तरैकसहस्रतमवत्सरं यावत् (1964 -1986 A.D) उपलभ्यमानेभ्यः वैखानसपाञ्चरात्रागमग्रन्थेभ्यः, कतिपयेभ्यः शैवागमग्रन्थेभ्यश्च आगमकोशोपयोगिनो विषयाः सङ्कलिताः संशोधिताश्च।

तैर्विद्वद्भिःसङ्कलिताःसंशोधिताः अपेक्षिताश्च वैखानसागमग्रन्थभागाः वैखानसागम-कोशसम्पुटेषु समावेश्यन्त समावेशयिष्यन्ते चेत्येतदत्राविस्मरणीयमास्ते।

समापितविषयसङ्कलनेभ्यो वैखानसागमग्रन्थेभ्य उद्धृतं वैखानसागमकोशस्य प्रथमं सम्पुटमर्चन-वासुविधान-आलयनिर्माणसंज्ञकप्रकरणत्रययुतं त्रिनवत्यधिकनवशतोत्तरैक-सहस्रतमे (1993) क्रैस्तवीयसंवत्सरे विद्यापीठेन प्रकाशितम्। निरवरोधं पुनरागमकोश-कार्यस्य निर्वर्तनाय विद्यापीठे आगमकोशपरियोजना मानवसंसाधनविकासमन्त्रालयेन द्व्यधिकद्विसहस्रतमे क्रिस्तुवत्सरे (2002) भूयः प्रकल्पिता।

बेरनिर्माण-बेरप्रतिष्ठा-नित्यार्चन-उत्सव-स्नपनप्रकरणगतविषयविशेषाः वैखानसागम-कोशस्य द्वितीयसम्पुटमारभ्य नवमसम्पुटपर्यन्तभागेषु प्रकाशिताः। सम्प्रति वैखानसागमकोशस्य दशमे सम्पुटे प्रायश्चित्तप्रकरणस्य विषयविशेषाः उपस्थाप्यन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किञ्च आगमशास्त्रानुरागिणां विदुषां सुखावबोधाय विविधशीर्षकगतविषयविशेषाणां सारः सम्पुटेऽस्मिन् पृथक् संयोजितः। अधिगताङ्ग्लभाषाणां जिज्ञासूनां कोशगतसंस्कृत-सारभागस्य सुबोधार्थं आचार्य पि. प्रभाकर आष्टे महोदयैः आङ्ग्लभाषयाऽनूदितः सारभागोऽपि अत्र सन्निवेशितो विराजते। एतत्कोशनिर्माणप्रकारविषये तथा क्लिष्टाया आगमशास्त्रीयभाषायाश्च विषये प्रथमसम्पुटे एव विस्तृततयोक्तमेवेति नात्र प्रतन्यते।

वैखानसागमकोशस्य निर्माणकार्ये उपकृतवद्भ्यः विद्यापीठस्य अनुसन्धानप्रकाशन-विभागस्थतदानीन्तनसूरिभ्यः श्रीमद्भ्यः डा. एम् . डि. बालसुब्रह्मण्यम् , डा. मुरलीधरपाण्डेय, डा. आर्. महादेवन्, डा. वि. स्वामिनाथन्, डा. पि. पि. आपटे, डा. यु. शङ्करभट्ट, डा. राघवप्रसाद चौधरी, लक्ष्मीनरसिंहभट्ट, ए. श्रीनिवास अय्यंगार् , पं. के. शठकोपाचार्य, डा. एन्. एस्. रामानुजताताचार्य, के. ए. बालसुब्रह्मण्यम् , डा. उमारमण झा, यशपालखजूरिया, डा.जयप्रसादबलोधी, डा. टि. जि. अनन्तसुब्रह्मण्यम् , एम्. ए. भट्ट, के. रघुनाथन्, श्रीराममिश्र, डा. के. हैमवतीशम् , डा. के. ई. गोविन्दन् , एम्. सायिरामसुब्रह्मण्यशर्मा, सि हेच् . पि. सत्यनारायण, एस्. सुब्बय्य संज्ञकेभ्यः शतशो धन्यवादान् वितरावः।

वैखानसागमकोशस्य दशमसम्पुटस्य प्रकाशने उपकृतवद्भ्यः प्राच्यप्रतीच्योभय-विद्याविभासुरेभ्यः साहित्यादिविविधशास्त्रकुशलेभ्यः कुलपतिभ्यः आचार्येभ्यः हरेकृष्णशतपथि महोदयेभ्यः, कुलसचिवेभ्यः आचार्येभ्यः ए. गुरुमूर्तिमहोदयेभ्यश्च आधमर्ण्यं प्रकटयावः।

ईक्ष्य (प्रूफ) संशोधने सहायकः डा. सुधांशु शेखर महापात्रमहोदयः साधुवादेन स्मर्यते सादरम् । वैखानसकोशग्रन्थस्यास्य टङ्कनकर्मणि तथा पुस्तकसमीकरणकार्ये च सहकृतवन्तं श्री एन् . वेङ्कटरमणप्रसाद्-नामानमाशीर्भिः योजयावः।

जगज्जीवातोः श्रीनिवासस्य कृपया वैखानसागमकोशस्य दशमं सम्पुटमिदं व्युत्पित्सूनाम् आगमतत्वकौतुकिजनानां विदुषां च बहूपकाराय स्यादिति मन्वहे।

तिरुपतिः — आचार्यः लक्ष्मीनरसिंहभट्टः

दिनाङ्कः २७.४.२००९ — आचार्यः हयवदनपुराणिकः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूचीपत्रम्

FOREWORD ... 7

उपोद्धातः ... 10

सूचीपत्रम् ... 13

विशिष्टविषयसूची ... 14

प्रयाश्चित्त प्रकरणे विषयविशेषाणां सारः ... 35

TOPICAL SUMMARY ... 69

वैखानसागमकोशे परामृष्टानां ग्रन्थानां सङ्केताः ... 163

प्रायश्चित्तप्रकरणम् ... 1 - 273

१. आलयनिर्माणदोषप्रायश्चित्तम् ... 3

२. बेरनिर्माणदोषप्रायश्चित्तम् ... 64

३. प्रतिष्ठादोषप्रायश्चित्तम् ... 90

४. नित्यार्चनदोषप्रायश्चित्तम् ... 164

५. स्नपनदोषप्रायश्चित्तम् ... 243

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशिष्टविषयसूची

१. आलयनिर्माणदोषप्रायश्चित्तम्

९.१.१	प्रायश्चित्तशब्दनिर्वचनम्	...	३
९.१.२	प्रायश्चित्तस्य अवश्यकर्तव्यता	...	४
९.१.३	प्रायश्चित्तस्वरूपनिर्धारणम्	...	५
९.१.४	भूपरीक्षायाम् अङ्कुरार्पणलोपे प्रायश्चित्तम्	...	५
९.१.५	अङ्कुरार्पणे विशेषार्चनलोपे प्रायश्चित्तम्	...	६
९.१.६	पङ्क्तिप्रमाणहानौ प्रायश्चित्तम्	...	६
९.१.७	काले अङ्कुरार्पणहानौ प्रायश्चित्तम्	...	७
९.१.८	साधिवासानां कर्मणां अङ्कुरार्पणविवेकः	...	८
९.१.९	भूपरीक्षागमनविघ्ने प्रायश्चित्तम्	...	८
९.१.१०	भूपरीक्षार्थगमने दुर्वाक्यश्रवणे प्रायश्चित्तम्	...	९
९.१.११	भूपरीक्षार्थगमने कलहादौ प्रायश्चित्तम्	...	९
९.१.१२	भूपरीक्षायां दुर्निमित्तदर्शने प्रायश्चित्तम्	...	१०
९.१.१३	भूपरीक्षाक्रमहीनादौ प्रायश्चित्तम्	...	१०
९.१.१४	भूपरीक्षायामग्निदाहादौ प्रायश्चित्तम्	...	११
९.१.१५	भूपरीक्षायां कन्याभोजनविरहे प्रायश्चित्तम्	...	११
९.१.१६	भूपरीक्षायां कन्यादीपविच्छेदादौ प्रायश्चित्तम्	...	११
९.१.१७	भूपरीक्षायां पांसुक्षये प्रायश्चित्तम्	...	११
९.१.१८	मार्गान्तरेण भूपरीक्षणे प्रायश्चित्तम्	...	१२
९.१.१९	भूपरीक्षामकृत्वा कर्षणे प्रायश्चित्तम्	...	१२
९.१.२०	अकालकृतभूपरीक्षादौ प्रायश्चित्तम्	...	१३
९.१.२१	विनायकपूजालोपे प्रायश्चित्तम्	...	१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.१.२२	हलादीनाम् उक्तवृक्षालाभादौ प्रायश्चित्तम् ...	१४
९.१.२३	युगादीनाम् उक्तवृक्षालाभे प्रायश्चित्तम् ...	१४
९.१.२४	युगादीनां प्रमाणहीने प्रायश्चित्तम् ...	१५
९.१.२५	कर्षणे वृषभाङ्गहानौ प्रायश्चित्तम् ...	१६
९.१.२६	कर्षणे वृषभव्रणप्रायश्चित्तम् ...	१७
९.१.२७	कर्षणे वृषभस्वापादिप्रायश्चित्तम् ...	१७
९.१.२८	कर्षणे विष्वक्सेनाद्यर्चनालोपे प्रायश्चित्तम् ...	१८
९.१.२९	कर्षणे रज्जुभेदादौ प्रायश्चित्तम् ...	१९
९.१.३०	कर्षणे युगादिभेदादौ प्रायश्चित्तम् ...	१९
९.१.३१	कर्षणे हलभेदादौ प्रायश्चित्तम् ...	२०
९.१.३२	कर्षणे मन्त्रलोपे प्रायश्चित्तम् ...	२०
९.१.३३	कर्षणे कपालास्थ्यादिदर्शने प्रायश्चित्तम् ...	२०
९.१.३४	भूपरीक्षादौ दोषसम्भवे प्रायश्चित्तम् ...	२१
९.१.३५	कर्षणादिलोपे प्रायश्चित्तम् ...	२२
९.१.३६	बीजावापे बीजे केशादिदर्शने प्रायश्चित्तम् ...	२३
९.१.३७	बीजावापानन्तरदोषप्रायश्चित्तम् ...	२३
९.१.३८	कर्षणे गोगणनिवेदनलोपे प्रायश्चित्तम् ...	२४
९.१.३९	कर्षणे पददेवताबलिलोपादौ प्रायश्चित्तम् ...	२४
९.१.४०	सामृतहारकहीनादौ प्रायश्चित्तम् ...	२५
९.१.४१	कर्षणे क्रियासङ्करप्रायश्चित्तम् ...	२५
९.१.४२	अकालकृतकर्षणादौ प्रायश्चित्तम् ...	२५
९.१.४३	सद्यो भूपरीक्षादौ प्रायश्चित्तम् ...	२६
९.१.४४	भूपरीक्षादौ यजमानादिकर्मविपर्यासे प्रायश्चित्तम् ...	२६
९.१.४५	उप्तबीजविनाशे प्रायश्चित्तम् ...	२७
९.१.४६	विमानार्थं भूखननकाले शल्यलोष्ठपाषाणादिदर्शने प्रायश्चित्तम् ...	२७
९.१.४७	ब्रह्मपद्मावटक्रियालोपे प्रायश्चित्तम् ...	२७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.१.४८	वास्तुहोमलोपे प्रायश्चित्तम्	...	२८
९.१.४९	पुण्याहवाचनलोपे प्रायश्चित्तम्	...	२८
९.१.५०	ब्रह्मपद्मावटे कपालादिदर्शने प्रायश्चित्तम्	...	२९
९.१.५१	ब्रह्मपद्मावटे वामावर्तजलप्रायश्चित्तम्	...	२९
९.१.५२	ब्रह्मपद्मावटे जलविपर्ययप्रायश्चित्तम्	...	३०
९.१.५३	ब्रह्मपद्मावटे जलस्पन्दनादौ प्रायश्चित्तम्	...	३०
९.१.५४	ब्रह्मपद्मावटे जलसङ्कुलप्रायश्चित्तम्	...	३०
९.१.५५	ब्रह्मपद्मावटे पद्मस्य अधरोत्तरत्वादौ प्रायश्चित्तम्	...	३१
९.१.५६	ब्रह्मपद्मावटे प्रक्षिप्तपद्मभङ्गे प्रायश्चित्तम्	...	३१
९.१.५७	ब्रह्मपद्मावटे पद्मविदिग्गतौ प्रायश्चित्तम्	...	३१
९.१.५८	ब्रह्मपद्मावटे पद्मस्फोटे प्रायश्चित्तम्	...	३१
९.१.५९	ब्रह्मपद्मावटे घटभेदादौ प्रायश्चित्तम्	...	३२
९.१.६०	ब्रह्मपद्मावटे दुर्निमित्तशान्तिलोपे प्रायश्चित्तम्	...	३२
९.१.६१	शङ्कुनिर्माणे द्विस्ताडने प्रायश्चित्तम्	...	३२
९.१.६२	शङ्कुभेदादौ प्रायश्चित्तम्	...	३३
९.१.६३	शङ्कुभङ्गे प्रायश्चित्तम्	...	३३
९.१.६४	आलयनिर्माणे शङ्कुस्थापनलोपप्रायश्चित्तम्	...	३३
९.१.६५	आलयनिर्माणे मुख्यमार्गेणोपक्रम्य गौणमार्गाश्रयणे प्रायश्चित्तम्	...	३३
९.१.६६	आलयनिर्माणे दिक्परिच्छेदलोपे प्रायश्चित्तम्	...	३४
९.१.६७	तरुणालये लौहबालबिम्बाभावे प्रायश्चित्तम्	...	३४
९.१.६८	आलयनिर्माणे तरुणालयाकरणप्रायश्चित्तम्	...	३५
९.१.६९	आलयनिर्माणे अन्यदेवोद्दिष्टस्थानादाने प्रायश्चित्तम्	...	३६
९.१.७०	आद्येष्टकामकृत्वा विमानकरणे प्रायश्चित्तम्	...	३६
९.१.७१	आद्येष्टकादिप्रमाणन्यूनातिरेकादौ प्रायश्चित्तम्	...	३७
९.१.७२	आद्येष्टकाक्रियाहानादौ प्रायश्चित्तम्	...	३७
९.१.७३	आद्येष्टकान्यासे रत्नन्यासलोपे प्रायश्चित्तम्	...	३७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.१.७४	आद्येष्टकान्यासे शिलेष्टकाग्रविपर्यासे प्रायश्चित्तम् ...	३८
९.१.७५	आद्येष्टकान्यासे इष्टकाग्रविपर्यासादौ प्रायश्चित्तम् ...	३९
९.१.७६	आद्येष्टकान्यासे मन्त्रविपर्यये प्रायश्चित्तम् ...	३९
९.१.७७	इष्टकासङ्करे प्रायश्चित्तम् ...	४०
९.१.७८	आद्येष्टकान्यासे यजमानाचार्यकर्मविपर्यासे प्रायश्चित्तम् ...	४०
९.१.७९	इष्टकान्यासादौ दक्षिणालोपे प्रायश्चित्तम् ...	४०
९.१.८०	आद्येष्टकाक्रियालोपे प्रायश्चित्तम् ...	४०
९.१.८१	प्राकारे आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४१
९.१.८२	गोपुरे आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४१
९.१.८३	मण्डपादौ आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४२
९.१.८४	महानसे आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४२
९.१.८५	भूतपीठे आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४२
९.१.८६	परिवारालये आद्येष्टकान्यासलोपे प्रायश्चित्तम् ...	४३
९.१.८७	गर्भन्यासे गर्भभाजनप्रमाणन्यूनतातिरेके प्रायश्चित्तम् ...	४३
९.१.८८	गर्भन्यासे रत्नालाभे प्रायश्चित्तम् ...	४३
९.१.८९	गर्भन्यासादौ सर्वधात्वलाभे प्रायश्चित्तम् ...	४४
९.१.९०	गर्भन्यासादौ सर्वबीजालाभे प्रायश्चित्तम् ...	४५
९.१.९१	गर्भन्यासलोपे प्रायश्चित्तम् ...	४६
९.१.९२	देवकार्यविहितद्रव्यलोपे प्रायश्चित्तम् ...	४७
९.१.९३	विमाननिर्माणे मूर्धेष्टकान्यासलोपादौ प्रायश्चित्तम् ...	४८
९.१.९४	विमाननिर्माणे स्थूपिकीलादीनां प्रमाणविरहादौ प्रायश्चित्तम् ...	४८
९.१.९५	परिवारालयादिनिर्माणे मूर्धेष्टकालोपादौ प्रायश्चित्तम् ...	४९
९.१.९६	आलयादेः त्वरया निर्माणे प्रायश्चित्तम् ...	४९
९.१.९७	विमाननिर्माणे द्रव्यसङ्करादौ प्रायश्चित्तम् ...	५०
९.१.९८	विमाननिर्माणे अनुक्तदेशे द्रव्यन्यासे प्रायश्चित्तम् ...	५०
९.१.९९	मूर्धशिलेष्टकाप्रमाणन्यूनतातिरेके प्रायश्चित्तम् ...	५१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.१.१०० विमाननिर्माणे स्थूपिशू(की?)लादिलोपे प्रायश्चित्तम् ... ५१
९.१.१०१ विमाननिर्माणे कलशादिक्रियालोपे प्रायश्चित्तम् ... ५१
९.१.१०२ विमाननिर्माणे हेमस्थापनलोपे प्रायश्चित्तम् ... ५२
९.१.१०३ कूटागारविहितलक्षणलोपप्रायश्चित्तम् ... ५२
९.१.१०४ विमाननिर्माणे कलभक्रियादिलोपे प्रायश्चित्तम् ... ५२
९.१.१०५ विमाननिर्माणे सुधालेपलोपे प्रायश्चित्तम् ... ५३
९.१.१०६ द्वादशाब्दोपरि आलयासमाप्तौ प्रायश्चित्तम् ... ५३
९.१.१०७ अनुक्तविमानदोषप्रायश्चित्तम् ... ५३
९.१.१०८ विमानादौ न्यूनतायां प्रायश्चित्तम् ... ५४
९.१.१०९ विमानभेदनादौ प्रायश्चित्तम् ... ५६
९.१.११० प्राकारगोपुरादिवैकल्यशान्तिः ... ५६
९.१.१११ द्वारस्तम्भादिप्रमाणहीनादौ प्रायश्चित्तम् ... ५७
९.१.११२ कवाटविरहे प्रायश्चित्तम् ... ५८
९.१.११३ आचार्यविपर्यासे प्रायश्चित्तम् ... ५८
९.१.११४ आचार्यर्त्विग्भर्त्सनादौ प्रायश्चित्तम् ... ६०
९.१.११५ गुरुयजमानकलहे प्रायश्चित्तम् ... ६०
९.१.११६ आचार्यादीनां मिथः कलहादौ प्रायश्चित्तम् ... ६१
९.१.११७ आचार्याद्यपचारप्रायश्चित्तम् ... ६२
९.१.११८ कर्मकरविद्वेषे प्रायश्चित्तम् ... ६३

२. बेरनिर्माणदोषप्रायश्चित्तम्

९.२.१ बालालयबेरस्य प्रमाणादिलोपे प्रायश्चित्तम् ... ६४
९.२.२ दारुसङ्ग्रहे विपरीतनिमित्तदर्शने प्रायश्चित्तम् ... ६४
९.२.३ दारुसङ्ग्रहे वृक्षस्य अनिष्टदिक्पतने प्रायश्चित्तम् ... ६४
९.२.४ दारुसङ्ग्रहे प्रोक्तदार्वलाभे प्रायश्चित्तम् ... ६५
९.२.५ दारुसङ्ग्रहे विपरीते प्रायश्चित्तम् ... ६५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.२.६	शिलादारुग्रहणे क्रियाविरहादौ प्रायश्चित्तम् ...	६६
९.२.७	बिम्बनिर्माणे प्रोक्तशिलाऽलाभे प्रायश्चित्तम् ...	६६
९.२.८	बिम्बनिर्माणे शिलागर्भदोषे प्रायश्चित्तम् ...	६६
९.२.९	बिम्बनिर्माणे शिलाग्रहणक्रियालोपे प्रायश्चित्तम् ...	६७
९.२.१०	बिम्बनिर्माणे शिलामुखाद्यपरिज्ञाने प्रायश्चित्तम् ...	६७
९.२.११	मधूच्छिष्टक्रियायां मन्त्रलोपे प्रायश्चित्तम् ...	६८
९.२.१२	मधूच्छिष्टक्रियाहानौ प्रायश्चित्तम् ...	६८
९.२.१३	बिम्बनिर्माणे उपादानद्रव्ययोजनक्रियालोपादौ प्रायश्चित्तम् ...	६९
९.२.१४	बिम्बनिर्माणे दोषदूषितमृदाहरणे प्रायश्चित्तम् ...	६९
९.२.१५	बिम्बनिर्माणे स्नेहद्रव्यलोपादौ प्रायश्चित्तम् ...	७०
९.२.१६	बेरे कृत्रिमवर्णलेपे प्रायश्चित्तम् ...	७०
९.२.१७	बेरशूलानां मानवैकल्ये प्रायश्चित्तम् ...	७१
९.२.१८	रत्नन्यासे मन्त्रलोपे प्रायश्चित्तम् ...	७२
९.२.१९	शूलस्थापनविपर्यासे प्रायश्चित्तम् ...	७२
९.२.२०	बिम्बनिर्माणे शूलस्थापनलोपे प्रायश्चित्तम् ...	७३
९.२.२१	शूलकल्पनलोपादौ प्रायश्चित्तम् ...	७४
९.२.२२	शूलस्थापने यजमानविपर्यासे प्रायश्चित्तम् ...	७४
९.२.२३	ध्रुवबेरक्रियालोपे प्रायश्चित्तम् ...	७४
९.२.२४	ध्रुवबेरे निषिद्धद्रव्यकृते प्रायश्चित्तम् ...	७६
९.२.२५	ध्रुवबेरस्य विध्याद्यतिक्रमेण कल्पने प्रायश्चित्तम् ...	८२
९.२.२६	ध्रुवबेरनिर्माणादिविपर्यासे प्रायश्चित्तम् ...	८३
९.२.२७	ध्रुवबेरस्य प्रमाणलोपे प्रायश्चित्तम् ...	८३
९.२.२८	ध्रुवरूपविपर्यासादौ प्रायश्चित्तम् ...	८३
९.२.२९	ध्रुवबेरस्य प्रत्यङ्गलोपे प्रायश्चित्तम् ...	८४
९.२.३०	ध्रुवबेरस्य जलाधिवासात् पूर्वमङ्गहानौ प्रायश्चित्तम् ...	८४
९.२.३१	कौतुकबिम्बे निषिद्धद्रव्यकृते प्रायश्चित्तम् ...	८५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.२.३२ कौतुकबिम्बे ध्रुवानुरूप्यविपर्यासादौ प्रायश्चित्तम् ... ८६
९.२.३३ कौतुकबिम्बे लौहगौरवे प्रायश्चित्तम् ... ८६
९.२.३४ शैलजध्रुवकौतुकयोः वर्णलोपे प्रायश्चित्तम् ... ८६
९.२.३५ कौतुकादिबेरवैरूप्यादौ प्रायश्चित्तम् ... ८७
९.२.३६ कौतुकाद्यलाभे प्रायश्चित्तम् ... ८७
९.२.३७ परिवारबिम्बे ध्रुवबेरद्रव्यातिरिक्तद्रव्यकृते प्रायश्चित्तम् ... ८७
९.२.३८ आलयविपर्यासादौ प्रायश्चित्तम् ... ८९

३. प्रतिष्ठादोषप्रायश्चित्तम्

९.३.१ प्रतिष्ठायां यागशालाप्रमाणन्यूनतादौ प्रायश्चित्तम् ... ९०
९.३.२ यागशालातोरणेषु प्रमाणहानौ प्रायश्चित्तम् ... ९२
९.३.३ यागशालादर्भमालालोपे प्रायश्चित्तम् ... ९२
९.३.४ अग्निकुण्डार्थम् अशुभदेशान्मृदाहरणे प्रायश्चित्तम् ... ९२
९.३.५ प्रतिष्ठायाम् अग्निकुण्डद्रव्यदोषे प्रायश्चित्तम् ... ९३
९.३.६ प्रतिष्ठायाम् अग्निकुण्डमानदोषे प्रायश्चित्तम् ... ९३
९.३.७ प्रतिष्ठाहोमस्थानविपर्यासे प्रायश्चित्तम् ... ९४
९.३.८ सभ्याग्निस्थापनलोपे प्रायश्चित्तम् ... ९४
९.३.९ वास्तुहोमे विहितदेशकालव्यतिक्रमे प्रायश्चित्तम् ... ९४
९.३.१० वास्त्वग्निसंस्थापने उक्तदिग्व्यतिक्रमे प्रायश्चित्तम् ... ९५
९.३.११ यागशालायां श्वकाकाद्युपहतिप्रायश्चित्तम् ... ९५
९.३.१२ अङ्कुरार्पणे ब्रह्माद्यर्चनलोपे प्रायश्चित्तम् ... ९५
९.३.१३ प्रतिष्ठायाम् अङ्कुरार्पणलोपे प्रायश्चित्तम् ... ९५
९.३.१४ प्रतिष्ठायाम् अङ्कुरार्पणोत्तरकर्मलोपे प्रायश्चित्तम् ... ९६
९.३.१५ पीठसंघाते रत्नालाभे प्रायश्चित्तम् ... ९६
९.३.१६ पीठसंघाते मन्त्रलोपे प्रायश्चित्तम् ... ९७
९.३.१७ पीठसंघाते आग्नेयविधानादिना कृते प्रायश्चित्तम् ... ९७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.३.१८	ध्रुवबेरस्थापने पीठविरहे प्रायश्चित्तम् ...	९७
९.३.१९	पीठलक्षणाभावे प्रायश्चित्तम् ...	९८
९.३.२०	लोहबिम्बस्य पीठभङ्गे प्रायश्चित्तम् ...	९९
९.३.२१	प्रतिष्ठायाम् अक्षिमोचनलोपे कालातिक्रमे च प्रायश्चित्तम् ...	९९
९.३.२२	प्रतिष्ठायाम् अक्षिमोचने वर्ज्यकालकृते प्रायश्चित्तम् ...	१००
९.३.२३	प्रतिष्ठायाम् अक्षिमोचने मन्त्रलोपादौ प्रायश्चित्तम् ...	१०१
९.३.२४	पीठसंघाताक्षिमोचनयोः क्रमविपर्यासे प्रायश्चित्तम् ...	१०१
९.३.२५	प्रतिष्ठायाम् अक्षिमोचनलोपे प्रायश्चित्तम् ...	१०१
९.३.२६	प्रतिष्ठायाम् अक्षिमोचनलोपादौ प्रायश्चित्तम् ...	१०२
९.३.२७	अक्षिमोचने गवादिदर्शनलोपे द्रव्यलोपे प्रायश्चित्तम् ...	१०२
९.३.२८	अक्षिमोचने क्रियालोपादौ प्रायश्चित्तम् ...	१०३
९.३.२९	अक्षिमोचने बेरशुद्धिहानौ प्रायश्चित्तम् ...	१०३
९.३.३०	अक्षिमोचने मन्त्रलोपादौ प्रायश्चित्तम् ...	१०३
९.३.३१	भूपरीक्षाद्यक्षिमोचनान्तलोपे प्रायश्चित्तम् ...	१०३
९.३.३२	अधिवासद्रव्यलोपे प्रायश्चित्तम् ...	१०४
९.३.३३	रत्नाद्यलाभे प्रायश्चित्तम् ...	१०४
९.३.३४	प्रतिष्ठायाम् अधिवासलोपे प्रायश्चित्तम् ...	१०४
९.३.३५	प्रतिष्ठायाम् अधिवासहोमलोपे प्रायश्चित्तम् ...	१०५
९.३.३६	हौत्रशंसने वैपरीत्यादिप्रायश्चित्तम् ...	१०५
९.३.३७	शेषहोमलोपे प्रायश्चित्तम् ...	१०६
९.३.३८	अग्निप्रणयनवैपरीत्यादिप्रायश्चित्तम् ...	१०६
९.३.३९	अग्निसंस्कारविपर्यासादिप्रायश्चित्तम् ...	१०७
९.३.४०	प्रतिष्ठायां मथिताग्निनाशे प्रायश्चित्तम् ...	१०७
९.३.४१	मथिताग्न्यलाभे प्रायश्चित्तम् ...	१०८
९.३.४२	प्रतिष्ठाहोमे स्रुगाद्यलाभे प्रायश्चित्तम् ...	१०९
९.३.४३	प्रोक्तसमिदलाभे प्रायश्चित्तम् ...	१०९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.३.४४	दर्भादिदोषे प्रायश्चित्तम्	...	११०
९.३.४५	परिस्तरणादिप्रमाणविरहे प्रायश्चित्तम्	...	११०
९.३.४६	परिस्तरणदर्भदाहादौ प्रायश्चित्तम्	...	१११
९.३.४७	प्रतिष्ठाहोमे दर्भपरिध्यादिलोपे प्रायश्चित्तम्	...	११२
९.३.४८	इन्धनदोषे प्रायश्चित्तम्	...	११२
९.३.४९	इध्मप्रक्षेपणेनाग्निप्रच्यावे प्रायश्चित्तम्	...	११३
९.३.५०	प्रतिष्ठाहोमे उक्तद्रव्यलोपे प्रायश्चित्तम्	...	११३
९.३.५१	उक्तद्रव्यादिलोपे प्रायश्चित्तम्	...	११३
९.३.५२	निषिद्धदधिक्षीरग्रहणे प्रायश्चित्तम्	...	११४
९.३.५३	निषिद्धाज्यहोमे प्रायश्चित्तम्	...	११४
९.३.५४	आज्यस्थाल्यादौ मक्षिकादिपतने प्रायश्चित्तम्	...	११५
९.३.५५	होमद्रव्यस्य अन्यत्र पतने प्रायश्चित्तम्	...	११६
९.३.५६	चरुविपर्यासादिप्रायश्चत्तिम्	...	११६
९.३.५७	आहुतिविपर्यासे प्रायश्चित्तम्	...	११६
९.३.५८	होम्यद्रव्यप्रमाणविरहे प्रायश्चित्तम्	...	११७
९.३.५९	आघारिताग्न्यनुगतिप्रायश्चित्तम्	...	११७
९.३.६०	प्रतिष्ठाहोमस्य श्वकुक्कुटादिस्पर्शे प्रायश्चित्तम्	...	११८
९.३.६१	होमद्रव्ये अस्पृश्यस्पर्शे प्रायश्चित्तम्	...	११९
९.३.६२	अग्निकुण्डे अशुचिद्रव्यस्पर्शे प्रायश्चित्तम्	...	११९
९.३.६३	प्रतिष्ठाहोमे अग्नेः पार्श्वज्वलने प्रायश्चित्तम्	...	११९
९.३.६४	अग्नेः वामावर्तादौ प्रायश्चित्तम्	...	१२०
९.३.६५	समित्प्रक्षेपणात् परम् अग्निसङ्कुलप्रायश्चित्तम्	...	१२०
९.३.६६	यज्ञकर्मणि अनुक्तप्रायश्चित्ते सर्वत्र प्रायश्चित्तम्	...	१२०
९.३.६७	होमे अनुक्तमुखे कार्याचरणे प्रायश्चित्तम्	...	१२१
९.३.६८	सर्वहोमविध्यतिक्रमे दोषप्रायश्चित्तम्	...	१२१
९.३.६९	यज्ञोपस्कारमन्त्रविपर्ययादिप्रायश्चित्तम्	...	१२२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.३.७०	अन्तहोमे क्रियालोपादौ प्रायश्चित्तम् ...	१२३
९.३.७१	होमे प्रयोगदोषे प्रायश्चित्तम् ...	१२३
९.३.७२	उक्तयागस्थानहानादौ प्रायश्चित्तम् ...	१२३
९.३.७३	प्रतिष्ठायां रात्रौ कुम्भस्थापने प्रायश्चित्तम् ...	१२४
९.३.७४	प्रतिष्ठायां कुम्भदोषे प्रायश्चित्तम् ...	१२४
९.३.७५	प्रतिष्ठायां कुम्भपूजकेषु भ्रमणादिदर्शनशान्तिः ...	१२५
९.३.७६	प्रतिष्ठायां साधितकुम्भे भिन्ने शान्तिः ...	१२५
९.३.७७	प्रतिष्ठायां कलशन्यासविपर्यासे प्रायश्चित्तम् ...	१२७
९.३.७८	प्रतिष्ठायां स्नपनकाले बेरविपर्यासे प्रायश्चित्तम् ...	१२८
९.३.७९	प्रतिष्ठायां श्वकुक्कुटाद्यस्पृश्यैः कुम्भस्पर्शे प्रायश्चित्तम् ...	१२८
९.३.८०	शयनाधिवासे वस्त्रदोषे प्रायश्चित्तम् ...	१२९
९.३.८१	शयनाधिवासे पञ्चशयनाभावे प्रायश्चित्तम् ...	१२९
९.३.८२	शयनाधिवासे कौतुकादिबेरशयनविपर्यासे प्रायश्चित्तम् ...	१३०
९.३.८३	शयनाधिवासे शयनस्थानविपर्यासे प्रायश्चित्तम् ...	१३०
९.३.८४	शयनाधिवासे शयनस्थानविपर्यासादौ प्रायश्चित्तम् ...	१३१
९.३.८५	प्रतिष्ठायाम् अकाले शयानदेवोद्धरणे प्रायश्चित्तम् ...	१३१
९.३.८६	रात्रौ प्रतिष्ठाकरणे प्रायश्चित्तम् ...	१३२
९.३.८७	प्रतिष्ठायां बहुद्रव्यक्रियालोपादौ प्रायश्चित्तम् ...	१३२
९.३.८८	गुणहीनस्थापककृते स्थापने प्रायश्चित्तम् ...	१३४
९.३.८९	अनुक्तनक्षत्रादौ स्थापने प्रायश्चित्तम् ...	१३५
९.३.९०	बेरस्थापनस्थानवैपरीत्ये प्रायश्चित्तम् ...	१३७
९.३.९१	जलाधिवासात् परं स्थापनात् पूर्वं बेरस्याङ्गहानौ प्रायश्चित्तम् ...	१३८
९.३.९२	प्रमाणहीनबेरस्थापने (प्रमाणहीनविमाने) प्रायश्चित्तम् ...	१३९
९.३.९३	ध्रुवस्थापनादर्वाक् प्रतिष्ठातश्च प्राक् अनुक्तदोषप्रायश्चित्तम् ...	१३९
९.३.९४	ग्रामादौ बलिलोपे बलिदानक्रमः ...	१४०
९.३.९५	बेरस्थापनविलम्बे प्रायश्चित्तम् ...	१४०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

९.३.९६	विमानसमाप्तौ ध्रुवबेरस्थापनलोपे प्रायश्चित्तम् ...	१४१
९.३.९७	प्रतिष्ठाविपर्यासे प्रायश्चित्तम् ...	१४३
९.३.९८	प्रतिष्ठायां रोदनादौ शान्तिः ...	१४३
९.३.९९	प्रतिष्ठाकालिकमरणादौ शान्तिः ...	१४३
९.३.१००	प्रतिष्ठाकालिकमहोत्पातादौ प्रायश्चित्तम् ...	१४४
९.३.१०१	ध्रुवबेरं विना कौतुकप्रतिष्ठायां प्रायश्चित्तम् ...	१४४
९.३.१०२	कौतुकबिम्बस्य आलयान्तरे स्थापने प्रायश्चित्तम् ...	१४५
९.३.१०३	कौतुकादिषु कुम्भजलेनावाहने प्रायश्चित्तम् ...	१४६
९.३.१०४	कौतुकबिम्बे अवस्थानवैपरीत्ये प्रायश्चित्तम् ...	१४६
९.३.१०५	कौतुकबिम्बस्फोटनादिप्रायश्चित्तम् ...	१४७
९.३.१०६	ध्रुवबेराङ्गहानौ प्रायश्चित्तम् ...	१४८
९.३.१०७	ध्रुवबिम्बविनाशे प्रायश्चित्तम् ...	१४९
९.३.१०८	ध्रुवबेरनाशे प्रायश्चित्तम् ...	१५०
९.३.१०९	बिम्बभेदनादौ प्रायश्चित्तम् ...	१५०
९.३.११०	ध्रुवबेरचालने प्रायश्चित्तम् ...	१५०
९.३.१११	विमानध्रुवबेरचालने पुनःप्रतिष्ठा ...	१५१
९.३.११२	शिलाबेरस्य अन्यालयादपहरणे प्रायश्चित्तम् ...	१५१
९.३.११३	अन्यालयस्थापितबिम्बस्य अन्यालयस्थापने प्रायश्चित्तम् ...	१५२
९.३.११४	प्रतिष्ठापितबेरत्यागे प्रायश्चित्तम् ...	१५३
९.३.११५	स्थापिते महाबेरे संस्कारलोपप्रांयश्चित्तम् ...	१५३
९.३.११६	स्थापिते महाबेरे अङ्गभङ्गे प्रायश्चित्तम् ...	१५४
९.३.११७	बिम्बचलने पुनःप्रतिष्ठा ...	१५४
९.३.११८	बेरोत्पाटने पुनःप्रतिष्ठा ...	१५५
९.३.११९	परिषद्देवावाहनादौ विपर्ययादि-प्रायश्चित्तम् ...	१५५
९.३.१२०	प्रतिष्ठायां भूपरीक्षादिलोपे प्रायश्चित्तम् ...	१५६
९.३.१२१	अध्ययनलोपे प्रायश्चित्तम् ...	१५७

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.३.१२२ प्रतिष्ठाविध्यतिक्रमे प्रायश्चित्तम् ... १५७
९.३.१२३ आचार्यदक्षिणाकालातिक्रमे प्रायश्चित्तम् ... १५७
९.३.१२४ प्रतिष्ठायां अन्नदानलोपे प्रायश्चित्तम् ... १५८
९.३.१२५ देवार्थद्रव्यदाहे प्रायश्चित्तम् ... १५८
९.३.१२६ गौणबिम्बस्थापने प्रायश्चित्तम् ... १५९
९.३.१२७ पञ्चमूर्तिप्रतिष्ठायां पृथग्घोमाद्यभावे प्रायश्चित्तम् ... १६०
९.३.१२८ पञ्चमूर्तिप्रतिष्ठायां क्रियाविपर्यासादिप्रायश्चित्तम् ... १६०
९.३.१२९ कर्षणादिप्रतिष्ठान्तायां सर्वक्रियायांविपर्यासे प्रायश्चित्तम् ... १६१
९.३.१३० तटाकादिप्रतिष्ठालोपे प्रायश्चित्तम् ... १६३

४. नित्यार्चनदोषप्रायश्चित्तम्

९.४.१ नित्यार्चनादोषप्रायश्चित्तफलम् ... १६४
९.४.२ नित्यार्चने आलयमार्जनादिलोपे प्रायश्चित्तम् ... १६४
९.४.३ अकाले आलयमार्जने प्रायश्चित्तम् ... १६५
९.४.४ नित्यार्चने अर्चकादिस्नानलोपप्रायश्चित्तम् ... १६५
९.४.५ ऊर्ध्वपुण्ड्रन्यासलोपे प्रायश्चित्तम् ... १६६
९.४.६ नित्यार्चने हर्म्यप्रदक्षिणादिलोपे प्रायश्चित्तम् ... १६६
९.४.७ नित्यार्चने युग्मप्रदक्षिणलोपे प्रायश्चित्तम् ... १६६
९.४.८ प्रणामदिग्विपर्यासे प्रायश्चित्तम् ... १६६
९.४.९ विमानादीनामतिलङ्घने प्रायश्चित्तम् ... १६७
९.४.१० नित्यार्चने कवाटोद्घाटनविलम्बप्रायश्चित्तम् ... १६७
९.४.११ कवाटोद्घाटने अमन्त्रके प्रायश्चित्तम् ... १६८
९.४.१२ नित्यार्चने देववन्दनलोपादौ प्रायश्चित्तम् ... १६९
९.४.१३ नित्यार्चने पात्रशोधनलोपे प्रायश्चित्तम् ... १६९
९.४.१४ नित्यार्चने अमन्त्रकं पूजाद्रव्यनयने प्रायश्चित्तम् ... १६९
९.४.१५ नित्यार्चने पूजाद्रव्याधिदेवतार्चनलोपे प्रायश्चित्तम् ... १६९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.१६	मन्त्राणां ऋष्यादिज्ञानाभावे प्रायश्चित्तम्	…	१७०
९.४.१७	नित्यार्चने पुण्याहवाचनादिलोपे प्रायश्चित्तम्	…	१७०
९.४.१८	नित्यार्चने सम्बन्धकूर्चलोपे प्रायश्चित्तम्	…	१७०
९.४.१९	नित्यार्चने स्नपनलोपे प्रायश्चित्तम्	…	१७१
९.४.२०	नित्यार्चने पुष्पन्यासलोपे प्रायश्चित्तम्	…	१७३
९.४.२१	नित्यार्चने परिषदर्चनलोपे प्रायश्चित्तम्	…	१७४
९.४.२२	नित्यार्चने मार्कण्डेयाद्यावरणदेवार्चनलोपे प्रायश्चित्तम्	…	१७४
९.४.२३	बिम्बस्य अर्चकान्यविप्रस्पर्शे प्रायश्चित्तम्	…	१७५
९.४.२४	बिम्बस्य उच्छिष्टाद्यशुचिविप्रस्पर्शे प्रायश्चित्तम्	…	१७५
९.४.२५	बिम्बस्य क्षत्रियस्पर्शे प्रायश्चित्तम्	…	१७५
९.४.२६	बिम्बस्य वैश्यस्पर्शे प्रायश्चित्तम्	…	१७५
९.४.२७	बिम्बस्य शूद्रस्पर्शे प्रायश्चित्तम्	…	१७५
९.४.२८	बिम्बस्य अनुलोमस्पर्शे प्रायश्चित्तम्	…	१७६
९.४.२९	बिम्बस्य प्रतिलोमस्पर्शे प्रायश्चित्तम्	…	१७६
९.४.३०	बिम्बस्य वेददूषक तान्त्रिकस्पर्शे प्रायश्चित्तम्	…	१७६
९.४.३१	अमन्त्रकार्चने प्रायश्चित्तम्	…	१७६
९.४.३२	भगवदर्चने मन्त्रस्खलने प्रायश्चित्तम्	…	१७७
९.४.३३	उपचारद्रव्यालाभे प्रायश्चित्तम्	…	१७७
९.४.३४	उपचारविपर्यासे प्रायश्चित्तम्	…	१७८
९.४.३५	मन्त्रासने उपचारविपर्यासे प्रायश्चित्तम्	…	१७८
९.४.३६	नित्यार्चने स्नानासने उपचारविपर्यासे प्रायश्चित्तम्	…	१७९
९.४.३७	नित्यार्चने स्नानासनोपचारलोपे प्रायश्चित्तम्	…	१८०
९.४.३८	अलङ्कारासने उपचारविपर्यासे प्रायश्चित्तम्	…	१८०
९.४.३९	भोज्यासने उपचारविपर्यासे प्रायश्चित्तम्	…	१८२
९.४.४०	उत्सवस्नपनबिम्बयोरभावे प्रायश्चित्तम्	…	१८३
९.४.४१	नित्यार्चने उपचारलोपे प्रायश्चित्तम्	…	१८३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.४२	नित्यार्चने आधावलोपे प्रायश्चित्तम् …	१८३
९.४.४३	नित्यार्चने स्वागतानुमाननलोपे प्रायश्चित्तम् …	१८३
९.४.४४	नित्यार्चने देवावाहनादिलोपादौ प्रायश्चित्तम् …	१८४
९.४.४५	नित्यार्चने देव्योरावाहनलोपे प्रायश्चित्तम् …	१८४
९.४.४६	नित्यार्चने ध्यानलोपप्रायश्चित्तम् …	१८५
९.४.४७	नित्यार्चने मन्त्रासनोपचारलोपे प्रायश्चित्तम् …	१८५
९.४.४८	नित्यार्चने पादुकासमर्पणलोप प्रायश्चित्तम् …	१८६
९.४.४९	नित्यार्चने नीराजनलोपे प्रायश्चित्तम् …	१८६
९.४.५०	नित्यार्चने प्लोतेन मार्जनलोपे प्रायश्चित्तम् …	१८६
९.४.५१	नित्यार्चने अलङ्करणलोपे प्रायश्चित्तम् …	१८६
९.४.५२	नित्यार्चने गन्धलेपनलोपे प्रायश्चित्तम् …	१८७
९.४.५३	नित्यार्चनादौ घण्टावादनलोपे प्रायश्चित्तम् …	१८७
९.४.५४	नित्यार्चने धूपदीपलोपे प्रायश्चित्तम् …	१८७
९.४.५५	नित्यार्चने स्तोमारोपणलोपे प्रायश्चित्तम् …	१८८
९.४.५६	नित्यार्चने सन्ध्यारक्षणलोपे प्रायश्चित्तम् …	१८८
९.४.५७	नित्यार्चने छत्रपिञ्छादिलोपे प्रायश्चित्तम् …	१८८
९.४.५८	नित्यार्चने नृत्तगीतलोपे प्रायश्चित्तम् …	१८८
९.४.५९	नित्यार्चने प्रमुखमण्डपलोपादौ प्रायश्चित्तम् …	१८९
९.४.६०	नित्यार्चने सन्ध्यादीपलोपे प्रायश्चित्तम् …	१८९
९.४.६१	नित्यार्चने अर्चनाकाले अजस्रदीपनिर्वाणे प्रायश्चित्तम् …	१८९
९.४.६२	अर्चनान्यकाले अजस्रदीपविच्छेदप्रायश्चित्तम् …	१९०
९.४.६३	अजस्रदीपनाशे प्रायश्चित्तम् …	१९०
९.४.६४	नित्यार्चने सर्वदीपनाशे प्रायश्चित्तम् …	१९०
९.४.६५	नित्यार्चने यवनिकालोपे प्रायश्चित्तम् …	१९०
९.४.६६	नित्यार्चने वेददूषकादिदर्शने प्रायश्चित्तम् …	१९१
९.४.६७	निर्माल्यार्चनादौ प्रायश्चित्तम् …	१९२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.६८	स्नपने निर्माल्येन पुनरर्चने प्रायश्चित्तम् ...	१९२
९.४.६९	नित्यार्चने नित्यहोमादिलोपे प्रायश्चित्तम् ...	१९२
९.४.७०	एककालादित्र्यहपर्यन्तं नित्यहोमलोपे प्रायश्चित्तम् ...	१९३
९.४.७१	कपाले मूर्तिहोमदोषप्रायश्चित्तम् ...	१९३
९.४.७२	नित्यार्चने मूर्तिहोमलोपे प्रायश्चित्तम् ...	१९४
९.४.७३	नित्यहोमे अग्न्यनुगत्यादि प्रायश्चित्तम् ...	१९४
९.४.७४	नित्यार्चने हविर्लोपे प्रायश्चित्तम् ...	१९४
९.४.७५	नित्यार्चने पक्वहविर्लोपे प्रायश्चित्तम् ...	१९६
९.४.७६	एकपात्रसिद्धहविषः भागशो निवेदने प्रायश्चित्तम् ...	१९६
९.४.७७	नित्यार्चने ग्रहणकालादौ पक्वहविर्निवेदने प्रायश्चित्तम् ...	१९७
९.४.७८	उपदंशादिहीनहविर्निवेदने प्रायश्चित्तम् ...	१९७
९.४.७९	अपक्वहविर्निवेदनादौ प्रायश्चित्तम् ...	१९८
९.४.८०	अन्यस्पृष्टहविर्निवेदने प्रायश्चित्तम् ...	१९९
९.४.८१	शर्करादियुतहविर्निवेदने प्रायश्चित्तम् ...	२०२
९.४.८२	नित्यार्चने मक्षिकादिसंयुक्तहविर्निवेदने प्रायश्चित्तम् ...	२०२
९.४.८३	मक्षिकादिसंयुक्तमहाहविर्निवेदनप्रकारः ...	२०३
९.४.८४	विगर्हितवस्तुनिवेदने प्रायश्चित्तम् ...	२०३
९.४.८५	पूजामध्ये तीर्थादिदानादौ प्रायश्चित्तम् ...	२०३
९.४.८६	दुष्टताम्बूलनिवेदने प्रायश्चित्तम् ...	२०४
९.४.८७	नित्यार्चने मुखवासलोपे प्रायश्चित्तम् ...	२०४
९.४.८८	नित्यार्चने अशुचिस्पृष्टद्रव्यसमर्पणप्रायश्चित्तम् ...	२०४
९.४.८९	नित्यार्चने बलिभ्रमणलोपादौ प्रायश्चित्तम् ...	२०५
९.४.९०	बलिभ्रमणे छत्रपिञ्छाद्यलाभे प्रायश्चित्तम् ...	२०७
९.४.९१	बलिभ्रमणे चामराद्यलाभे प्रायश्चित्तम् ...	२०७
९.४.९२	बलिभ्रमणे दीपालाभे प्रायश्चित्तम् ...	२०७
९.४.९३	बलिभ्रमणे वाद्यादिलोपे प्रायश्चित्तम् ...	२०७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.९४	बलिभ्रमणे बलिप्रमाणवैकल्य प्रायश्चित्तम् ...	२०८
९.४.९५	बलिभ्रमणे अन्नबल्यलाभे प्रायश्चित्तम् ...	२०८
९.४.९६	बलिभ्रमणे आवाहनलोपे प्रायश्चित्तम् ...	२०८
९.४.९७	बलिभ्रमणे बले: पतनादौ प्रायश्चित्तम् ...	२०९
९.४.९८	अलिभ्रमणे बलिधारकपतने प्रायश्चित्तम् ...	२०९
९.४.९९	बलिभ्रमणे बले: स्त्रीशूद्रादिस्पर्शे प्रायश्चित्तम् ...	२०९
९.४.१००	बलिभ्रमणे बले: अस्पृश्यस्पर्शादौ प्रायश्चित्तम् ...	२१०
९.४.१०१	बलिभ्रमणे बले: केशादिदूषणे प्रायश्चित्तम् ...	२१०
९.४.१०२	दूषितहविर्निवेदने प्रायश्चित्तम् ...	२१०
९.४.१०३	बलिभ्रमणे प्रोक्तबलिपात्रालाभे प्रायश्चित्तम् ...	२११
९.४.१०४	बलिभ्रमणे बलिपात्रप्रमाणहानौ प्रायश्चित्तम् ...	२११
९.४.१०५	बलिभ्रमणे बल्यग्रखण्डनिवेदनलोपे प्रायश्चित्तम् ...	२११
९.४.१०६	बलिभ्रमणकाले मरणे शान्ति: ...	२१२
९.४.१०७	नित्यार्चने बलिदानलोपे प्रायश्चित्तम् ...	२१२
९.४.१०८	एककालबलिलोपे प्रायश्चित्तम् ...	२१३
९.४.१०९	प्रातर्मध्याह्नयो: बलिलोपे प्रायश्चित्तम् ...	२१३
९.४.११०	एकाहे बलिलोप प्रायश्चित्तम् ...	२१३
९.४.१११	सप्तरात्रपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१४
९.४.११२	व्यहादिद्वादशाहपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१५
९.४.११३	द्वादशाहोपरि बलिलोपे प्रायश्चित्तम् ...	२१५
९.४.११४	पक्षपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१५
९.४.११५	मासपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१५
९.४.११६	त्रिमासपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१६
९.४.११७	वत्सरपर्यन्तं बलिलोपे प्रायश्चित्तम् ...	२१६
९.४.११८	संवत्सरोपरि बलिलोपे प्रायश्चित्तम् ...	२१७
९.४.११९	अर्चनाङ्गपदार्थदोषादिप्रायश्चित्तम् ...	२१८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.१२० अन्यदेवपूजासाधनैरर्चने प्रायश्चित्तम् ... २१८
९.४.१२१ नित्यार्चने विमानादिबिम्बाङ्गवैकल्ये शान्तिः ... २१८
९.४.१२२ प्रथमतः पूजकेतरैः तीर्थादिस्वीकारे प्रायश्चित्तम् ... २१९
९.४.१२३ उक्तकाले द्वारबन्धनाकरणे प्रायश्चित्तम् ... २१९
९.४.१२४ नित्यार्चने बुद्धिकृतलोपे प्रायश्चित्तम् ... २२०
९.४.१२५ नित्यार्चन नित्योत्सववत् प्रायश्चित्ताचरणम् ... २२०
९.४.१२६ नित्यार्चने बलिप्रदक्षिणन्यूनतातिरेकप्रायश्चित्तम् ... २२०
९.४.१२७ नित्यार्चने ज्ञाताज्ञातदोषसामान्यप्रायश्चित्तम् ... २२०
९.४.१२८ मासान्ते सर्वदोषप्रायश्चित्तम् ... २२१
९.४.१२९ संवत्सरान्ते सर्वदोषप्रायश्चित्ताचरणम् ... २२२
९.४.१३० नित्यार्चनान्ते अपराधक्षमायाचनम् ... २२५
९.४.१३१ शान्तिहोमः पूजालोपादिनिमित्तकः ... २२७
९.४.१३२ नित्यार्चनादौ अनियमप्रायश्चित्तार्थः विष्णुयागः ... २२८
९.४.१३३ नित्यार्चने प्रातः सन्ध्याद्यर्चनलोप प्रायश्चित्तम् ... २२८
९.४.१३४ नित्यार्चने एकाहादिद्वादशाहपर्यन्तमर्चनलोपे प्रायश्चित्तम् ... २३०
९.४.१३५ नित्यार्चने एकाहादिपक्षपर्यन्तमर्चनलोपे प्रायश्चित्तम् ... २३०
९.४.१३६ नित्यार्चने एकाहादिमासपर्यन्तमर्चनलोपे प्रायश्चित्तम् ... २३१
९.४.१३७ नित्यार्चने द्वादशाहादिमासपर्यन्तमर्चनलोपे प्रायश्चित्तम् ... २३२
९.४.१३८ नित्यार्चने मासादूर्ध्वं संवत्सरपर्यन्तमर्चनलोपे प्रायश्चित्तम् ... २३३
९.४.१३९ नित्यार्चने संवत्सरादूर्ध्वम् अर्चनलोपे प्रायश्चित्तम् ... २३५
९.४.१४० नित्यार्चने संवत्सरादिद्वादशवत्सरपर्यन्तमर्चनलोपे प्रायश्चित्तम्... २३७
९.४.१४१ नित्यार्चने द्वादशाब्दोपरि अर्चनलोपे प्रायश्चित्तम् ... २३९
९.४.१४२ नित्यार्चने अज्ञानकृतलोपे प्रायश्चित्तम् ... २३९
९.४.१४३ आलयावरणाद् बाह्ये मनुष्यमृतौ अर्चनाक्रमः ... २३९
९.४.१४४ ग्रामीणमरणोत्तरं शवसंस्कारात् पूर्वं च भगवदर्चने प्रायश्चित्तम् ... २४०
९.४.१४५ प्रायश्चित्ताचरणे प्रशस्तकालानपेक्षा ... २४०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.४.१४६ गृहार्चायां प्रातःपूजालोपे प्रायश्चित्तम् ... २४१
९.४.१४७ गृहार्चायां द्वादशदिनादर्वाक् पूजालोप प्रायश्चित्तम् ... २४१
९.४.१४८ गृहार्चायां द्वादशदिनपूजालोपे प्रायश्चित्तम् ... २४१
९.४.१४९ गृहार्चायां मासादूर्ध्वं पूजालोपे प्रायश्चित्तम् ... २४१
९.४.१५० गृहार्चायां संवत्सरपूजालोपे प्रायश्चित्तम् ... २४१
९.४.१५१ गृहार्चायां स्पर्शानर्हस्पर्शे प्रायश्चित्तम् ... २४२
९.४.१५२ गृहार्चाप्रायश्चित्ते सर्वदेवसाधारणांशः ... २४२

५. स्नपनदोषप्रायश्चित्तम्

९.५.१ स्नपने कालातिक्रमे प्रायश्चित्तम् ... २४३
९.५.२ नित्यादिस्नपनलोपे प्रायश्चित्तम् ... २४३
९.५.३ नैमित्तिकस्नपनलोपे प्रायश्चित्तम् ... २४४
९.५.४ स्नपने प्रतिसरबन्धादिलोपे प्रायश्चित्तम् ... २४५
९.५.५ स्नपने देवप्रबोधनलोपे प्रायश्चित्तम् ... २४५
९.५.६ स्नपने अङ्कुरार्पणपात्रप्रमाणन्यूनतातिरेके प्रायश्चित्तम् ... २४५
९.५.७ स्नपने अङ्कुरार्पणलोपे प्रायश्चित्तम् ... २४६
९.५.८ स्नपने अङ्कुरार्पणानन्तरस्नपनलोपे प्रायश्चित्तम् ... २४६
९.५.९ स्नपनमण्डपे मानन्यूनतातिरेके प्रायश्चित्तम् ... २४७
९.५.१० स्नपनमण्डपे निषिद्धस्थानप्रायश्चित्तम् ... २४७
९.५.११ स्नपनमण्डपे तोरणदोषे प्रायश्चित्तम् ... २४७
९.५.१२ स्नपनमण्डपे तोरणादिविपर्यासे प्रायश्चित्तम् ... २४८
९.५.१३ स्नपनमण्डपे तोरणादिलोपे प्रायश्चित्तम् ... २४८
९.५.१४ स्नपनालये पङ्क्तिप्रमाणलोपे प्रायश्चित्तम् ... २४८
९.५.१५ स्नपनालये वेदिप्रमाणलोपे प्रायश्चित्तम् ... २४९
९.५.१६ स्नपनश्वभ्रे प्रमाणलोपे प्रायश्चित्तम् ... २४९
९.५.१७ स्नपनश्वभ्रादि प्रमाणन्यूनतातिरेकप्रायश्चित्तम् ... २४९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.५.१८ स्नपने स्थानव्यत्यये प्रायश्चित्तम् ... २४९
९.५.१९ स्नपने कलशप्रमाणन्यूनतातिरेकप्रायश्चित्तम् ... २५०
९.५.२० स्नपने कलशभेदने प्रायश्चित्तम् ... २५१
९.५.२१ स्नपने कलशभेदनादौ प्रायश्चित्तम् ... २५१
९.५.२२ स्नपने कलशसङ्कुलप्रायश्चित्तम् ... २५२
९.५.२३ स्नपनकलशे श्वकाकादिस्पर्शे प्रायश्चित्तम् ... २५२
९.५.२४ स्नपने कलशादीनां श्वकाकादिस्पर्शे प्रायश्चित्तम् ... २५२
९.५.२५ स्नपने यथोक्तमृदलाभे प्रायश्चित्तम् ... २५३
९.५.२६ स्नपनद्रव्यपर्वतप्रमाणलोपे प्रायश्चित्तम् ... २५३
९.५.२७ पर्वतस्य मानन्यूनतातिरेके प्रायश्चित्तम् ... २५३
९.५.२८ स्नपने पर्वतलोपादौ प्रायश्चित्तम् ... २५३
९.५.२९ स्नपने सर्वधान्यालाभे प्रायश्चित्तम् ... २५४
९.५.३० स्नपनद्रव्यधान्यप्रमाणलोपे प्रायश्चित्तम् ... २५४
९.५.३१ स्नपने धान्यलोपे प्रायश्चित्तम् ... २५४
९.५.३२ स्नपने अङ्कुरालाभे प्रायश्चित्तम् ... २५४
९.५.३३ स्नपने मङ्गलानां मानन्यूनतातिरेके प्रायश्चित्तम् ... २५५
९.५.३४ स्नपने अष्टमङ्गललोपादौ प्रायश्चित्तम् ... २५५
९.५.३५ स्नपनकूर्चादिप्रमाणन्यूनताप्रायश्चित्तम् ... २५५
९.५.३६ स्नपनद्रव्यन्यूनतातिरेके प्रायश्चित्तम् ... २५६
९.५.३७ स्नपने पञ्चगव्यप्रमाणलोपे प्रायश्चित्तम् ... २५६
९.५.३८ स्नपने पञ्चगव्ययथोक्तयोगलोपे प्रायश्चित्तम् ... २५६
९.५.३९ स्नपने मधुलोपे प्रायश्चित्तम् ... २५७
९.५.४० स्नपने गन्धोदकलोपे प्रायश्चित्तम् ... २५८
९.५.४१ स्नपने अक्षतलोपे प्रायश्चित्तम् ... २५८
९.५.४२ स्नपने फललोपे प्रायश्चित्तम् ... २५८
९.५.४३ स्नपने कुशोदकार्थककुशलोपे प्रायश्चित्तम् ... २५९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.५.४४	स्नपने रत्नोदकार्थकरत्नलोपे प्रायश्चित्तम्	...	२५९
९.५.४५	स्नपने जप्योदमन्त्रलोपे प्रायश्चित्तम्	...	२५९
९.५.४६	स्नपने सर्वौषधिलोपे प्रायश्चित्तम्	...	२६०
९.५.४७	स्नपने पुण्यपुष्पलोपे प्रायश्चित्तम्	...	२६०
९.५.४८	स्नपने पुण्यपुष्पादिलोपे प्रायश्चित्तम्	...	२६०
९.५.४९	स्नपने सर्वचूर्णलोपे प्रायश्चित्तम्	...	२६१
९.५.५०	स्नपने कषायार्थद्रव्यलोपे प्रायश्चित्तम्	...	२६१
९.५.५१	स्नपने तीर्थलोपे प्रायश्चित्तम्	...	२६१
९.५.५२	स्नपने गन्धलोपे प्रायश्चित्तम्	...	२६१
९.५.५३	स्नपने प्लोतलोपे प्रायश्चित्तम्	...	२६२
९.५.५४	स्नपने मूलगन्धलोपे प्रायश्चित्तम्	...	२६२
९.५.५५	स्नपने सर्वधातुलोपे प्रायश्चित्तम्	...	२६२
९.५.५६	स्नपने अलङ्कारविपर्यासे प्रायश्चित्तम्	...	२६२
९.५.५७	स्नपने उक्तसङ्ख्याकवस्त्रलोपे प्रायश्चित्तम्	...	२६३
९.५.५८	स्नपने वस्त्रलोपे प्रायश्चित्तम्	...	२६३
९.५.५९	स्नपने भूषणलोपे प्रायश्चित्तम्	...	२६३
९.५.६०	स्नपने प्रत्युपचारोक्तद्रव्यलोपे प्रायश्चित्तम्	...	२६४
९.५.६१	स्नपने द्रव्यकलशस्थानसङ्करे प्रायश्चित्तम्	...	२६४
९.५.६२	स्नपने विपर्यासेन द्रव्यादाने प्रायश्चित्तम्	...	२६४
९.५.६३	स्नपने अजादिघृतस्नपने प्रायश्चित्तम्	...	२६५
९.५.६४	स्नपने दधिदोषे प्रायश्चित्तम्	...	२६६
९.५.६५	स्नपने क्षीरदोषे प्रायश्चित्तम्	...	२६६
९.५.६६	स्नपनद्रव्ये अशुचिस्पर्शे प्रायश्चित्तम्	...	२६६
९.५.६७	स्नपने घृते कृम्यादिपतने प्रायश्चित्तम्	...	२६७
९.५.६८	स्नपनद्रव्ये कृमिकीटादिपतने प्रायश्चित्तम्	...	२६७
९.५.६९	स्नपने द्रव्यदाहे प्रायश्चित्तम्	...	२६८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९.५.७० स्नपने द्रव्यसङ्करादि प्रायश्चित्तम् ... २६८

९.५.७१ स्नपने उक्तद्रव्याद्यासंभरणे प्रायश्चित्तम् ... २६८

९.५.७२ यथोक्तस्नपनलोपे कर्तव्यक्रमः ... २६९

९.५.७३ स्नपने उक्तद्रव्यलोपे प्रायश्चित्तम् ... २६९

९.५.७४ स्नपने हारिद्रस्नानलोपादौ प्रायश्चित्तम् ... २६९

९.५.७५ स्नपने विष्वक्सेनार्चनलोपे प्रायश्चित्तम् ... २६९

९.५.७६ स्नपने पङ्क्तीशार्चनलोपे प्रायश्चित्तम् ... २७०

९.५.७७ स्नपने इन्द्राद्यर्चनलोपे प्रायश्चित्तम् ... २७०

९.५.७८ स्नपने सर्वदोषप्रायश्चित्तम् ... २७०

९.५.७९ स्नपने तैलाभ्यङ्गे प्रायश्चित्तम् ... २७१

९.५.८० स्नपने बिम्बपतने प्रायश्चित्तम् ... २७१

९.५.८१ देवीभ्यां सह स्नपने प्रायश्चित्तम् ... २७२

९.५.८२ स्नपने हविषः कृम्यादिदूषणे प्रायश्चित्तम् ... २७३

९.५.८३ स्नपने निर्माल्येन पुनरर्चनप्रायश्चित्तम् ... २७३

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैखानसागमकोशस्य दशमं सम्पुटम्

९. प्रायश्चित्तप्रकरणम् [प्रथमो भागः]

विषयविशेषाणां सारः

१. आलयनिर्माणदोषप्रायश्चित्तम्

प्रायो नाम दोषः। तस्य चित्तं नाम परिहारः। कर्मणि प्रमादाद्वाऽशक्तेर्वाऽदृष्टाद्वा संभवन्तो ये दोषास्तेषां परिहारः जपहोमादिना कर्तुं शक्यते। तत् प्रायश्चित्तम्। कर्मणामिष्टफलसिध्यर्थं तदावश्यकम्। व्याधेरौषधेन यथा शान्तिः एवं कर्मणि सम्भवतां न्यूनातिरेकलोपादिदोषाणां प्रायश्चित्तेन शान्तिः करणीया। कर्मकाले उत्पाताद्यमङ्गलदर्शनेन सूचितानामपि दोषाणां शान्तिहोमादिना परिहारः करणीयः। अन्यथा कर्मणा लोकस्य शान्तिसुखसमृद्धिरूपेष्टफलं न जायेत। जायेत चानिष्टं राष्ट्रस्य दुर्भिक्षव्याधि-शत्रुचोरादिभयरूपम्। अतो वैदिकेषु कर्मसु क्रियाविपर्यासे कर्तृविपर्यासे मन्त्रलोपे द्रव्यलोपे कालविपर्यासेऽनुष्ठाने न्यूनातिरिक्ते सङ्करादौ च सर्वत्र सर्वदोषपरिहाराय शान्तिप्रायश्चित्तकर्माणि आगमशास्त्रे विहितानि।

भूपरीक्षादिकर्मणि अङ्कुरार्पणं न कृतं चेत् ब्रह्मादीनां षण्णां मन्त्रैर्वैष्णवैः पालिकाधिपतीनां जयादीनां च मूर्तिमन्त्रैः होमं कृत्वाऽङ्कुरार्पणं कृत्वा पश्चात्तत्कर्माचरेत्। विशेषार्चनलोपे द्विगुणमर्चयेत्। अङ्कुरार्पणे विशेषेणार्चनं कौतुके कुर्यात्। अन्यालयाङ्गबिम्बानामुत्सवाद्यर्थेऽङ्कुरार्पणे विशेषार्चनं ध्रुवबेर एव कार्यम्। पङ्क्तिप्रमाणहानौ पङ्क्तीशमूर्तिमन्त्रैर्होमः कार्यः।

साधिवासानां कर्मणां सद्यः अङ्कुरार्पणं कर्तव्यं चेत् पूर्वरात्रौ अधिवासनं पूर्वमेव कर्तव्यम्। ततः अक्षिमोचनं कृत्वा वास्तुहोमादिकं आचरेत्। दिनद्वयेऽपि कालावकाशेऽलब्धे तु सद्यः अङ्कुरार्पणं कृत्वा नयनोन्मीलनादिकं कार्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूपरीक्षार्थं बहिर्द्वारगमने विघ्नमायाति चेत् शान्तिहोमं कृत्वा विष्णुमन्त्रं शतवारं जपेत्। विघ्नमन्त्रमपि शतवारं जपेत्। दुर्वाक्यश्रवणे च सारस्वतमन्त्रं जप्त्वा देवं ध्यात्वा गच्छेत्। कलहे रुधिरस्रावेऽग्निदाहे च वैष्णवं सौम्यं वैष्वक्सेनं सौदर्शनं गारुडं च होमं लौकिकाग्नौ कुर्यात्। वैश्वानरमन्त्रं च जपेत्। भूपरीक्षाकाले दुर्निमित्ते जाते वैष्णवविष्णुसूक्तपुरुषसूक्तैः होमं कृत्वा विष्णुगायत्रीं सावित्रीं चाष्टशतवारं जपेत्। शाकुनसूक्तस्वस्तिसूक्ते दशवारं जपेत्।

भूपरीक्षाक्रमहीने कर्षणेऽपि क्रमहीने उक्तधान्यविहीने हलादीनां हीने गोगणनिवेदने हीने च सौम्यं वैष्णवं च हुत्वा प्रत्येकं कर्म पुनः प्रारभेत। भूपरीक्षायां अग्निदाहादौ सौम्यं वैष्णवञ्च हुत्वा लौकिकाग्नौ वैश्वक्सेनं सौदर्शनं, वारुणं च जुहुयात्।

कन्याभोजनाकरणे दुर्गामन्त्रहोमः कार्यः। कन्यादीपविच्छेदे पङ्कजस्य पतने श्रीसूक्तहोमः कार्यः। पांसुक्षये पूर्णाहुतिं मिन्दाहुतिं च जुहुयात्। भूसूक्तं जपेत्। भूपरीक्षामकृत्वा कर्षणं कृतं चेत् भूसूक्तहोमं कृत्वा पश्चात् भूपरीक्षापूर्वकं कर्षणं कार्यम्। भूपरीक्षामकृत्वा विष्णुयज्ञ आरब्धश्चेत् आहुतिसहस्रं हुत्वा भूमियज्ञं भूतहोमं च कृत्वा वृषभचतुष्टयदक्षिणां दद्यात्। आदौ विनायकार्चनं च कर्तव्यम्। अकाले भूपरीक्षा कृता चेत्, कर्षकैर्बीजवापकैश्च क्रियालोपे विपर्यासे च कृते, यथोक्तहोमद्विगुणं हुत्वा देवमर्चयेत्। तल्लोपे तन्मन्त्रेण शतवारं जुहुयात्।

हलादीनामुक्तवृक्षालाभे प्रमाणहीने च विष्णुसोमाग्निप्रजापतिहोमं व्याहृतिहोमं च कुर्यात्। वृक्षाधिपतिमर्चयेत्। सुवर्णेन हलादीनि कृत्वा कर्म कुर्यात्। युगादीनामुक्त-वृक्षालाभे भूविष्णुरुद्रात्मदैवत्यहोमं दानं च कुर्यात्। भगवन्तमभ्यर्च्य सुवर्णभारैरलङ्कुर्यात्। युगादीनां प्रमाणलोपे विष्णुप्रजापतियमरुद्रहोमान् कुर्यात्। वृषभावङ्गहीनौ चेत् विष्णुब्रह्मवीशप्रजापतिभूतर्षिमन्त्रैर्होमः कार्यः। अन्यौ वृषभौ आहरेत्। कर्षणकाले वृषभः प्रमादतो व्रणयुक्तो भवति चेत् विष्णुसूक्तपुरुषसूक्ताभ्यां होमः कार्यः। मिन्दाहुतिः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

